| बाल मुकुन्दाष्टकम् | bāla mukundāṣṭakam |
|---|---|
| करारविन्देन पदारविन्दं<br>मुखारविन्दे विनिवेशयन्तम्।<br>वटस्य पत्रस्य पुटे शयानं<br>बालं मुकुन्दं मनसा स्मरामि॥१॥ | karāravindena padāravindaṁ<br>mukhāravinde viniveśayantam\|<br>vaṭasya patrasya puṭe śayānaṁ<br>bālaṁ mukundaṁ manasā smarāmi\|\|1\|\| |
| संहृत्य लोकान् वटपत्र मध्ये<br>शयानम् आद्यन्त विहीन रूपम्।<br>सर्वेश्वरं सर्वहितावतारं<br>बालं मुकुन्दं मनसा स्मरामि॥२॥ | saṁhṛtya lokān vaṭapatra madhye<br>śayānam ādyanta vihīna rūpam\|<br>sarveśvaraṁ sarvahitāvatāraṁ<br>bālaṁ mukundaṁ manasā smarāmi\|\|2\|\| |
| इन्दीवर श्यामल कोमलाङ्गं<br>इन्द्रादि देवार्चित पादपद्मम्।<br>सन्तानकल्प द्रुमम् आश्रितानां<br>बालं मुकुन्दं मनसा स्मरामि॥३॥ | indīvara śyāmala komalāṅgaṁ<br>indrādi devārcita pādapadmam\|<br>santānakalpa drumam āśritānāṁ<br>bālaṁ mukundaṁ manasā smarāmi\|\|3\|\| |
| लम्बालाकं लम्बित हारयष्टिं<br>श्रिङ्गार लीलाङ्कित दन्तपङ्क्तिम्।<br>बिम्बाधरं चारुविशाल नेत्रं<br>बालं मुकुन्दं मनसा स्मरामि॥४॥ | lambālākaṁ lambita hārayaṣṭiṁ<br>śriṅgāra līlāṅkita dantapaṅktim\|<br>bimbādharaṁ cāruviśāla netraṁ<br>bālaṁ mukundaṁ manasā smarāmi\|\|4\|\| |
| शिक्ये निधायाद्य पयोदधीनि<br>बहिर्गतायां व्रजनायिकायाम्।<br>भुक्त्वा यथेष्टं कपटेन सुप्तं<br>बालं मुकुन्दं मनसा स्मरामि॥५॥ | śikye nidhāyādya payodadhīni<br>bahirgatāyāṁ vrajanāyikāyām\|<br>bhuktvā yatheṣṭaṁ kapaṭena suptaṁ<br>bālaṁ mukundaṁ manasā smarāmi\|\|5\|\| |

| | |
|---|---|
| कलिन्दजान्त स्थितकालियस्य<br>फणाग्ररङ्गे नटनप्रियन्तम्।<br>तत्पुच्छहस्तं शरदिन्दुवक्त्रं<br>बालं मुकुन्दं मनसा स्मरामि॥६॥ | kalindajānta sthitakāliyasya<br>phaṇāgraraṅge naṭanapriyantam\|<br>tatpucchahastaṁ śaradinduvaktraṁ<br>bālaṁ mukundaṁ manasā smarāmi\|\|6\|\| |
| उलूखले बद्धम् उदारशोर्यं<br>उत्तुङ्ग युग्मार्जुन भङ्गलीलम्।<br>उत्फुल्ल पद्मायत चारुनेत्रं<br>बालं मुकुन्दं मनसा स्मरामि॥७॥ | ulūkhale baddham udāraśoryaṁ<br>uttuṅga yugmārjuna bhaṅgalīlam\|<br>utphulla padmāyata cārunetraṁ<br>bālaṁ mukundaṁ manasā smarāmi\|\|7\|\| |
| आलोक्य मातुर्मुखमादेरेण<br>स्तन्यं पिबन्तं सरसीरुहाक्षम्<br>सच्चिन्मयं देवम् अनन्त रूपम्<br>बालं मुकुन्दं मनसा स्मरामि॥८॥ | ālokya māturmukhamādereṇa<br>stanyaṁ pibantaṁ sarasīruhākṣam<br>saccinmayaṁ devam ananta rūpam<br>bālaṁ mukundaṁ manasā smarāmi\|\|8\|\| |